# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**– शास्त्री (SEM-1) | **प्रश्नपत्रम्**–६ (New & Old) | **गुणाः** – ७० |
| **विषयः** – धर्मशास्त्रम् | **कोड**– **CC- 1-1-2** | **समयः** – २ तः ५ |
| **दिनाङ्कः** – २०/१२/२०१८ | **सन्दर्भग्रन्थः**– मनुस्मृतिः (मन्वर्थटीका) अध्याय १–२ | |

**॥ प्रथमान्वितिः ॥**

**प्र–१ द्वयोः श्लोकयोः सन्दर्भपूर्वकंभावार्थं लिखत।** **१०**

१. यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥

२. यदा स देवो जागर्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति॥

३. लोकानां तु विवद्धयर्थं मुखबाहूरूपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निवर्तयत्।

**प्र–२ एकस्य उत्तरं योग्यतया देयः।** **१०**

१. धर्मलक्षणं विलिख्य युगानां धर्मान् लिखत।

२. सृष्ट्युत्पत्तिक्रमं यथाग्रन्थं निरूपयत।

**॥ द्वितीयान्वितिः ॥**

**प्र–३ द्वयोः श्लोकयोः सन्दर्भपूर्वकं भावार्थं लिखत।** **१०**

१. संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः।
व्रतानि यमधर्माश्च सर्वे सङ्कल्पजाः स्मृताः॥

२. एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः॥

३. एकाक्षरं परंब्रह्म प्राणायामः परं तपः।
सावित्र्यात्तु परं नास्ति मौनात्सत्यं विशिष्यते॥

**प्र–४ एकस्य उत्तरं योग्यतया देयः।** **१०**

१. वेदेऽखिलो धर्ममूलम्, धर्मशास्त्रं तु वै स्मृतिः – यथाग्रन्थं चर्चयत।

२. संस्कारस्य का आवश्यकता? मनुप्रतिपादितसंस्काराः के? यथाग्रन्थं लिखत।

## ॥ तृतीयान्वितिः ॥

**प्र-५ ग्रन्थानुसारं सविस्तरेण द्वयोः विषये लिखत ।** **१०**

१. सावित्र्यास्तु परं नास्ति ।

२. सर्वे ते जपयज्ञस्य कलां नार्हन्तिषोडशीम् ।

३. विद्या ब्राह्मणेत्याह शेवधिस्तेऽस्मि रक्ष माम् ।

**प्र-६ एकः समाधेयः ।** **१०**

१. आचारः परमो धर्मः ।

२. मनुस्मृतिः ।

## ॥ चतुर्थान्वितिः ॥

**प्र-७ दशप्रश्नानां लघूत्तराणि यच्छत ।** **१०**

१. स्मृतिः कीदृशं शास्त्रमस्ति?

२. गायत्रीः - इत्यस्य का व्युत्पत्तिः?

३. बलवानिन्द्रियग्रामो किं करोति?

४. केषां शुश्रूषा परमं तप उच्यते?

५. आचार्यो कस्य मूर्तिः?

६. पिता कस्य मूर्तिः?

७. माता कस्य मूर्तिः?

८. दुष्कुलाद् अपि किं ग्राह्यम्?

९. विषादपि किं ग्राह्यम्?

१०. बालात् किं ग्राह्यम्?

११. मनुस्मृतिः शब्दस्य कः समासः?

१२. गुरुनिन्दाश्रवणेन किं भवति?

१३. धर्मं जिज्ञासमानानां परमं प्रमाणं किम्?

१४. कति अर्थाः ? के च ते?

१५. कैः सेवितो धर्मः ज्ञेयः पालनीयश्च?

-००-